श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीवैराग्यपञ्चकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवैराग्यपञ्चकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

क्षोणीकोणशतांशपालनकलादुर्वारगर्वानल-
    क्षुभ्यत्क्षुद्रनरेन्द्रचाटुरचनाधन्यान् न मन्यामहे।
देवं सेवितुमेव निश्चिनुमहे योऽसौ दयालुः पुरा
    धानामुष्टिमुचे कुचेलमुनये दत्ते स्म वित्तेशताम्॥ १॥

सिलं किमनलं भवेदनलमौदरं बाधितुं
    पयः प्रसृतिपूरकं किमु न धारकं सारसम्।
अयत्नमलमल्लकं पथि पटच्चरं कच्चरं
    भजन्ति विबुधा मुधा ह्यहह कुक्षितः कुक्षितः॥ २॥

ज्वलतु जलधिक्रोडक्रीडत्कृपीडभवप्रभा-
    प्रतिभटपटुज्वालामालाकुलो जठरानलः।
तृणमपि वयं सायं सम्फुल्लमल्लिमतल्लिका-
    परिमळमुचा वाचा याचामहे न महीश्वरान्॥ ३॥

दुरीश्वरद्वारबहिर्वितर्दिका-
    दुरासिकायै रचितोऽयमञ्जलिः।
यदञ्जनाभं निरपायमस्ति मे
    धनञ्जयस्यन्दनभूषणं धनम्॥ ४॥

शरीरपतनावधि प्रभुनिषेवणापादनात्
    अबिन्धनधनञ्जयप्रशमदं धनं दन्धनम्।
धनञ्जयविवर्धनं धनमुदूढगोवर्धनं
    सुसाधनमबाधनं सुमनसां समाराधनम्॥ ५॥

www.prapatti.com

नास्ति पित्रार्जितं किञ्चित् न मया किञ्चिदार्जितम्।
अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम्॥ ६ ॥

॥ इति श्रीवैराग्यपञ्चकं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com